http://www.sgbauonline.com/



**B.A. Part–I (Semester–II) Examination**

**SANSKRIT LITERATURE**

**(Literature of Classical Language)**

Time : Three Hours] [Maximum Marks : 80

**Note :—** Write answers in medium offered.

**सूचना :—** उत्तरे स्वीकृत माध्यमातून लिहावीत.

**सूचना :—** उत्तर स्वीकृत माध्यम में लिखिए।

1. Translate any **FIVE** of the following :— 20

कोणत्याही **पाच** श्लोकांचा अनुवाद करा :—

किन्हीं **पाँच** श्लोकों का अनुवाद कीजिए :—

(i) लभेत सिकतासु तैलमपि यत्नत: पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दित:।
कदाचिदपि पर्यटञ्छशविषाणमासादयेत्
न तु प्रतिनिविष्ट मूर्खजनचित्तमाराधयेत्।।

(ii) शक्यो वारयितुं जलेन हुतभुक् छात्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधिमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्।।

(iii) येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्म:।
ते मर्त्यलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति।।

(iv) हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा
ह्यर्थिभ्य: प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम्।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान्प्रति मानमुज्झत नृपा: कस्तै: सह स्पर्धते।।

(v) केयुराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्वला:
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजा:।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।

(vi) जाड्यं धीयो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेत: प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गति: कथय किं न करोति पुंसाम्।।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(vii) वहति भुवनश्रेणीं शेषः फणाफलकास्थितां
कमठपतिना मध्येपृष्ठं सदा स च धार्यते।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-
दहह ! महतां निःसीमानश्चरित्रविभूतयः।

(viii) मणिः शाणोल्लीढः समरविजयी हेतिनिहतो
मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तन्मिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः।।

2. Write an answer of any **ONE** of the following :— 13
कोणत्याही **एका** प्रश्नाचे सविस्तर उत्तर लिहा :—
किसी **एक** प्रश्न का उत्तर सविस्तार लिखें :—

Write in detail about सज्जनपद्धति।
सज्जनपद्धती चे सविस्तर वर्णन करा.
सज्जनपद्धति का सविस्तार वर्णन कीजिए।

**OR/किंवा/अथवा**

Write about the time of भर्तृहरि.
भर्तृहरिच्या काळासंबंधीची मते स्पष्ट करा.
भर्तृहरि के कालनिर्णय के संदर्भ में मतमतांतरों का स्पष्टीकरण कीजिए।

3. Write short notes on any **THREE** :— 15
टिपा लिहा कोणत्याही **तीन** :—
टिप्पणियाँ लिखिए कोई भी **तीन** :—

(i) विद्या माहात्म्यम्
(ii) अर्थपद्धतिः
(iii) मूर्खपद्धतिः
(iv) दुर्जनपद्धतिः
(v) नीतिः

4. Translate any **FOUR** of the following :— 16
कोणत्याही **चार** श्लोकांचा अनुवाद करा :—
किसी भी **चार** श्लोकों का अनुवाद कीजिए :—

(i) अणेवंशः ख्यातः श्रुतिपठनविध्वस्तदुरित-
स्तथा धर्मश्रद्धाव्रतयमतपः शुद्धचरितः।
अहं संजातोऽस्मिन् विमलतमशीले द्विजकुले
नतो वै तान् नित्यं मुनिवरनिभान् पूर्वजगुरून्।।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(ii) योऽजोऽपरो वेदमुखो द्विजोऽपि
यो रुक्मिणीप्राप्तिवशाद्धरित्वम्।
संपादयामास हि यः शिवत्वं
गङ्गोदकक्लिन्नशिरोरुहैश्च।।

(iii) माता मे द्विजसेवनपरा सच्छ्रोत्रियस्यात्मजा
सर्वत्रैव गतस्पृहः कृषिरतो बालाजिपुत्रः पिता।
ऋग्वेदं च पपाठ यः क्रमयुतं साङ्गं सब्राह्मणं
वन्दे शक्तिमहेशपूज्यपितरौ तौ रुक्मिणीश्रीहरी।।

(iv) रक्तोष्णीषं शिरसि रुचिरं चन्दनाङ्कं च भाले
हस्ते यष्टिं तुहिनधवलामङ्गरक्षां शरीरे।
स्कन्धाज्जानूपुरि विलसितं चोत्तरीयं दधानं
बालं भव्यं तिलककुलजं लोकमान्यं नमामि।।

(v) प्रसन्ना वाग्देवी सततसुखदा भक्तवशगा
निशान्ते स्वप्ने मां कलितमहिमानं गणपतेः।
अवोचत् सानन्दं स्थिरचरगुरुः शम्भुतनयः
कलौ बुद्धेर्ज्ञाता हरतु तव विघ्नाननुदिनम्।।

(vi) नाथं-मुक्त-मयूर-वामन-तुका दासांस्तथा तां जनीं
दासो-श्रीधरः-नामदेवः-बहिणा श्रीदेवनाथादिकान्।
वन्दे तं च गुलाबमद्भुतमतिं श्रीवासुदेवं यतिं
तांबे-बी-टिळकांश्च केशवसुते भक्त्या कवीन् नूतनान्।।

5. Choose the correct alternative any **SIXTEEN** of the following :— 16
खालीलपैकी कोणत्याही **सोळा** प्रश्नांचे पर्याय लिहा :—
निम्नलिखित में से किन्हीं **सोलह** प्रश्नों के उत्तर लिखिये :—

(1) माहेश्वरसूत्राणां रचनाकारः कः ?

(i) शङ्करः (ii) गणेशः
(iii) पाणिनी (iv) पातञ्जली

(2) अष्टाध्यायी कः लिखितवान् ?

(i) पाणिनी (ii) वरदाचार्यः
(iii) मम्मटाचार्यः (iv) भट्टोजी दीक्षितः

(3) वार्तिकानां रचनाकारः कः ?

(i) वरदाचार्यः (ii) भर्तृहरिः
(iii) कात्यायनः (iv) मम्मटाचार्यः

(4) अष्टाध्यायाः कति अध्यायाः सन्ति ?

(i) पंच (ii) षड्
(iii) अष्ट (iv) दश



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(5) पाणिनीसूत्रानाम् उपरि भाष्यः केन लिखितम् ?

(i) कात्यायनः (ii) भट्टोजी दीक्षितः

(iii) वरदाचार्यः (iv) पतञ्जली

(6) सिद्धान्तकौमुदी ग्रन्थस्य रचनाकारः कः ?

(i) भट्टोजी दीक्षितः (ii) वरदाचार्यः

(iii) मम्मटाचार्यः (iv) यास्काचार्यः

(7) भाष्यः नाम किम् ?

(i) सूत्रम् च वार्तिकम् (ii) सूत्रम् च भाष्यम्

(iii) केवलं सूत्राणि (iv) केवलं वार्तिकम्

(8) लघुसिद्धान्तकौमुदी ग्रन्थस्य रचनाकारः कः ?

(i) पाणिनी (ii) पातञ्जली

(iii) भट्टोजी दीक्षितः (iv) वरदराजः

(9) संज्ञासूत्रम् नाम किम् ?

(i) शास्त्रीयशब्द परिचयः (ii) सूत्रपरिचयः

(iii) अर्थपरिचयः (iv) परिभाषा

(10) सूत्राणां परस्पर विरोधः येषां सहाय्याने दूरी क्रियते ते _______ सूत्राणि सन्ति।

(i) संज्ञा (ii) परिभाषा

(iii) विधि (iv) नियम

(11) उत्तरोत्तरस्वार्थसमर्पकसूत्रस्य अभिधानं किम् ?

(i) अधिकारसूत्रम् (ii) अतिदेशसूत्रम्

(iii) विधिसूत्रम् (iv) संज्ञा सूत्रम्

(12) उपदेशे हलित् किम् स्यात् ?

(i) आद्यम् (ii) मध्यम्

(iii) अन्त्यम् (iv) न कोऽपि

(13) प्रसक्तस्य अदर्शनं _______ संज्ञ स्यात्।

(i) लोपः (ii) आदेशः

(iii) हल् (iv) संज्ञा

(14) तात्वदिषु सभागेषु स्थानेषु उर्ध्वभागे निष्पन्नो अच् _______ संज्ञः स्यात्।

(i) अनुदत्तः (ii) उदात्तः

(iii) ह्रस्वः (iv) दीर्घः

(15) उदात्तानुदात्तत्वे वर्णधर्मौ समाक्रियेते अस्मिन्सोऽच् _______ संज्ञः स्यात्।

(i) उदात्तः (ii) अनुदात्तः

(iii) स्वरितः (iv) दीर्घः



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(16) तुल्यास्य प्रयत्नं ______ ।

(i) असवर्णम् (ii) सवर्णम्

(iii) विषमवर्णम् (iv) न कोऽपि

(17) अकुहविसर्जनीयानां ______ ।

(i) कण्ठः (ii) तालु

(iii) ओष्ठः (iv) दन्ताः

(18) एदैतोः ______ ।

(i) कण्ठोष्ठम् (ii) दन्तोष्ठम्

(iii) जिह्वामूलम् (iv) कण्ठतालु

(19) यत्नस्य कति प्रकाराः सन्ति ?

(i) एकधा (ii) द्विधा

(iii) त्रिधा (iv) चतुर्धा

(20) जिह्वामूलीयस्य ______ स्थानम् अस्ति।

(i) दन्ताः (ii) ओष्ठः

(iii) दन्तोष्ठः (iv) जिह्वामूलीयः



http://www.sgbauonline.com/

http://www.sgbauonline.com/

http://www.sgbauonline.com/